Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४५२६

Title वैश्वदेव पर्व:

Author ०

Extent ९ Age ×

Subject धर्मशास्त्रं

वैश्वदेवपर्व

५५२७

लेखी रचक दर्शकं नास्ति

5527

#3 MISSING
F=9

श्रीगणेशाय नमः ॥ ॥ अथ वरुणप्रघासाः ॥ यजमानः ॥ अग्नी रक्षोणः
समारोप्योद्वसाय मथित्वा विहृत्य गार्हपत्ये स्मार्तवदाज्यं संस्कृत्य स्रु
चि चतुर्गृहीतं गृहीत्वाहवनीये मनस्वत्या जुहोति ॥ मनो ज्योतिरिति ॥
मनस्वतेइदं ॥ समारोपपक्ष एवं सर्वत्र कुर्यात् ॥ यजमानः याः पुरस्ता
दित्यादि श्रीपरमेश्वर० वरुणप्रघासहविर्भिर्यक्ष्ये ॥ इति संकल्प्य तन्त्र
मध्वतामित्यादि तथैसंतमुक्त्वा ॥ वरुणप्रघासहविः । व्रीहिमयः पुरोड
शाद्रव्यं० । व्रीहिमयः श्चरुः आमिक्षा द्रव्यं ॥ नवप्रयाजाः अग्नीषोमावा
ज्यभागौ ॥ आग्नेयोऽष्टाकपालः पुरोडाशः १ सौम्यश्चरुः २ सावित्रो द्वादशाक
पालः ३ सारस्वतश्चरुः ४ पौष्णश्चरुः ५ ऐन्द्राग्न एकादश० शः ६ मारु
त्यामिक्षा ७ वारुण्यामिक्षा ८ काय एककपालः पुरोडाशः ९ अग्निः स्विष्टकृत् र
श्चायक्ष्ये ॥ इति संकल्प्य ॥ अध्वर्युः इडादेवहूरित्यादि अग्नी विहृत्य अध्व

युः प्रतिप्रस्थातारौ प्रकृतिवद्दन्नीष्मौ सहोन्वाहर्ध्यात्॥ तत्र दक्षिणतः प्रतिप्रस्थाता
त्तरतोध्वर्यु यजमानस्य व्रतांते प्रतिप्रस्थाता पूर्वं मारुत्याः शाखाहरणादि कु
र्यात्॥ ततोध्वर्युर्वारुण्याः शाखा॰ ततोध्वर्युः बर्हिः संभरणे प्रथमं प्रस्तरं पूर्वं पंच
पंचमुष्टीन् संभरेत्॥ ततः प्रतिप्रस्थाता प्रस्तरं पूर्वं मुष्टित्रय संभरणक्रमेणासा
दनांतं प्रकृतिवत्॥ उभौ परिभोजनीं वेदिध्मसंनहनांतं वैश्वदेववत्॥ उभावाह
रणक्रमेण शाखापवित्रादि सायंदोहांतं कुर्यात्॥ तत्र प्रतिप्रस्थातुर्विशेषः॥ एतो॰
॰मरुतो रमयंतु गावः॥॰॥ कामधुक्ष्वः॰ मरुद्भ्यो हविरिंद्रियावद्बहु दुग्धि॰ मरुद्भ्यो
देवेभ्यो ह॰ सोमेन त्वा॰ मरुद्भ्यो दधि॥ अध्वर्युः एता आ चरं॰ इह वो वरुणो रम
यंतु॰ कामधुक्ष्व॰ हविर्वरुणाय हविरिंद्रियं॰ बहु दुग्धि॰ वरुणाय दैवे॰ कल्पतां॥
सोमेन॰ वरुणाय दधि॥ ॥ अथ प्रातर्हुतेग्निहोत्रे उभौ पाणिसंमर्जनादि कुर्या
तां॥ अध्वर्युरेवाग्नीन्परिस्तृणाति सनाभि चर्परिकल्पयति॥ अध्वर्युः पांसुवं वे
द्यां पात्राणि सादयेत्॥ पात्रासादने द्वात्रिंशत्कपालान्यन्यानि वैश्वदेववत्॥ ॥

प्रतिप्रस्था ॥ दक्षिणस्यां श्रुच्यस्य चमग्निहोत्रहवणीं जुहूमुपभृतं स्रुवं ध्रुवां आ
ज्यस्थालीं वेदं आभिक्षास्थालीं मेक्षणं आभिक्षाव्युद्धरणपात्रं वेदपरिवासनमुप
वेषमिध्मप्रव्रश्चनमहादक्षिणतः समिद्गौ निरसनोपवेशने कृत्वा न बृहस्पतिरित्या
दि ब्रह्मजपं नयजमानो भूपत इत्यादि अध्वर्युरेव पृषदाज्यास्तरणमिति ॥ उभौ मंत्रेणप
वित्रे कुरुतः ॥ अध्वर्युरेव प्रणीताप्रणयनं कुर्यात् ॥ अध्वर्युः दक्षिणेनाग्निहोत्रह
वणीं सव्येन स्फ्यमादत्ते ॥ प्रति॰ अग्निहोत्रहवणीमेव॰ उभयोरपि वेषाय
त्वा निमिचः ॥ प्रतितपनं मंत्रेणोभयोः ॥ अध्वर्युरेवाग्नेयादि पंच हवींषि
वैश्वदेववान्निरूप्य देवस्य त्वा॰ भ्यामिन्द्राग्निभ्यां जुष्टं॰ देवस्य त्वा॰ भ्यां का
काय जुष्टं॰ उभौ प्रोक्षणीसंस्कुरुतः । उभौ आपो देवी॰ प्रोक्षिता स्थ इत्यंत
कृत्वा ॥ अध्वर्युः प्रातर्हुतेऽग्निहोत्रे तदानीमेव गार्हपत्यस्य इषड्ढ्यानां यवानां
वितुषीकृतानां सूक्ष्मपिष्टानां तप्ताभिरद्भिर्घृतेन दध्ना वा संयक् ज्यक्तानि

दीपपात्राकाराणि यज्ञमानत सुत्रपोत्राग्नत्त उद्धृत स्मार्यसिंखयया न्येकातिरि
क्तानि करंभपात्राणि तादृशानि पिष्टानामेव वस्त्रं गमेषम अग्नं गामेषी च स्थु क्ला
पानि प्रछन्नो कृत्वा ॥ अध्वर्युः देवस्य त्वा॰ भ्यामग्नये यवो जुष्टं प्रोक्षामि सोमा
य सावित्रे सरस्वत्ये पूष्णे इ द्रा ग्निभ्यां कायेति मंत्रमुक्ता हविंषि त्रिः प्रोक्ष्य ॥
१ पुनर्देवस्य॰ भ्यां वरुणा यवो जुष्टं प्रोक्षामीति मंत्रमुक्ता॰ प्रति प्र॰ करंभपा
त्राणि मेषमेषी च त्रिः प्रोक्ष्य उभौ शुंधध्वं मंत्रमुक्ता स्वस्वपात्राणि प्रोक्षेत् ॥ अध्व
र्युः अवधूतं रक्ष इत्यादि तुष निरसन काले अवभृतार्थं काश्चित् तुषान् निधायेतरानि
रस्य तंडुल प्रक्षालन निनयनांतं कृत्वा॰ प्रतिप्रस्थाता मारुत्याः स्नायंदो ह वन॥
संक्षालन निनयनांतं मातर्दोहं दोहयति ॥ उभयोरपि शिखा पवित्रयोरुदगग्रं निधा
नं । आतचनाद्युपरितनं तंत्रं नोह्यते ॥ ततो ध्वर्युरेन अंतरितं रक्ष इत्यादि वैश्वदे
वं वत्स ॥ चरव्यान्विमज्याधिवपति ॥ देवस्य त्वा॰ भ्यामग्नये जुष्टमधि वपामि सवि

मभ्रूतात्।।परिकर्मिवत्संधेन्वासंसृज्याध्वर्युमित्याह।उपसृष्टा।।अध्वर्युर्दोह्यमानामनुमंत्रयते।।हुत
स्तोकोहुतोद्रप्सोग्नयेबृहतेनाकायस्वाहा।द्यावापृथिवीभ्यां।।परिकर्मिणंवेद्युत्करावंतरेणअपद्यसा
न्नाय्यंतपन्यांदुग्धंपुरस्तात्प्रत्यङ्मुखंसिंचंतंपश्यति।।कामधुक्ष्वःप्रणोब्रूहिविश्वेभ्योदेवेभ्योहविरिं
द्रियं।।परिकर्म्मप्राह।।गंगां।यस्यांदेवानांमनुष्याणांपयोहितम्।अध्वर्युस्तामनुमंत्रयते।।साविश्वायुः
एवंद्वितीयामुपसृष्टामित्यादि।।यमुनाम्।।यस्यांदे॰तं।।साविश्वव्यचाः।एवंतृतीयामुपसृष्टामित्यादि॰
सरस्वतीं।।यस्यांदे॰तं।।साविश्वकर्मा।तिसृषुदुग्धासुवाचंविसृजते।।बहुदुग्धिविश्वेभ्योदेवेभ्यो
देवेभ्योहव्यमाप्यायतांपुनः।।वत्सेभ्योमनुष्येभ्यःपुनर्दोहायकल्पतां।।शाखापवित्रमन्वारभ्यतूष्णीं
उत्तरादोहयित्वादोहनेपआनीयसंक्षालनमानयति।संपृच्यध्वमृतावरीरूर्मिणीर्मधुमत्तमामंद्रा
धनस्यसातये।।अथैनंतप्त्वोदगुद्वास्यशीतीकृत्यउदगग्रंपवित्रंनिधायस्रुवेणदध्नातनक्ति।सोमेनत्वा
तनच्मिविश्वेभ्योदेवेभ्योदधि।।अग्निहोत्रोच्छेषणमभ्यातनक्ति।।यज्ञस्यसंततिरसियज्ञस्यत्वासंतति
मनुसंतनोमि।।अथैनमुदन्वताकंसेनापिधाति।।अदस्तमसिविष्णवेत्वायज्ञायापिदधाम्यहं।।अद्भि

रस्त्रिके नपात्रेयाः पूताः परिशेरते ॥ तदुपरी वनिदधाति ॥ यत्रगुप्तंमन्यते ॥ विष्णोहव्यं रक्षस्व ॥ गोधंगत्वा
४ प्रातर्दोहार्थंतु स्त्री दर्भैर्वत्सानपाकरोति ॥ ॥ अथप्रातराहुतेग्निहोत्रेगार्हपत्येस्मार्तवदाज्यंसंस्कृत्य
स्रुक्स्रुवंनिष्टप्यसंमृज्यस्रुचि चतुर्गृहीतंगृहीत्वा आहवनीये समिधमाधाययजमानेन्वारब्धः
५ पंचहोतारंमनसाहुत्याहवनीयेजुहोति ॥ अग्निर्होता । अश्विनाध्वर्यू ॥ त्वष्टाग्नीत् ॥ मित्रउपवक्ता ॥ सो
मः सोमस्य पुरोगाः ॥ शुक्रः शुक्रस्य पुरोगाः ॥ श्रातास्तइंद्र सोमाः । वातापेर्हवनश्रुतः स्वाहा ॥ वाचस्प
ते ब्रह्मणइदं ॥ ततोयद्देवायदद्यात्समायुष्टइति । त्रिभिरनुवाकैः प्रत्युचं स्रुवेणाज्यंयजमानो वैश्वान
रायेति ॥ द्वादशाक्रुग्भिः समित्पाणिरुपधाय ॥ यन्मयेत्यनयासमिधमाधायाध्वर्यवे वरंदत्वा चतुर्गृ
हीताभ्यांसारस्वतौ होमौ जुहोति ॥ पूर्णापश्चादुत पूर्णापुरस्तादुन्मध्यतः पौर्णमासी जिगाय ॥ यस्यां ४
देवा अधिसंवसंतउत्तमेनाकइहमादयंतां ॥ अग्नीषोमौ प्रथमौ वीर्येण वसून्रुद्रानादित्यानिहजिन्व
तां ॥ माध्यं हि पौर्णमासंजुषेथां ब्रह्मणावृद्धौ सुकृतेनसाताव्धास्मभ्यं सहवीरं रयिंनियच्छतं स्वा
हा ॥ पौर्णमास्याइदं ॥ निवेशनीसंगमनीवसूनांविश्वारूपाणिवसून्यावेशयंती ॥ सहस्रपोषं सुभगार

राणासानआगन्वर्चसासंविदाना॥यत्ते देवा अदधुर्भागधेयं ममावास्ये संवसंतो महित्वा॥सानोयज्ञंपि

पृहि विश्ववारे रयिंनो धेहि सुभगे सुवीरं स्वाहा॥अमावास्याया इदं॥कर्मणे वामित्यादि पात्रा

सादने अष्टाविंशतिकपालैः सह चतस्रश्चरुस्थालीः॥तावंति मेक्षणानि उपभृता सह दृषदाज्यग्रह

णी आज्यस्थाल्या सह दधिस्थाली अपूर्वा उपस्थाली चरु दारुपात्र्या सह आमिक्षाव्युद्धरणपात्रं आशे

यपात्रं च धृष्ट्या सहोपवेषमिति सादयति॥निर्वपणे॥देवस्य त्वा० भ्यामग्नये जुष्टं निर्वपामि॥देवस्य०

भ्यां सोमाय जु०॥देवस्य० भ्यां सवित्रे जुष्टं निर्वपामि॥देवस्य० भ्यां सरस्वत्यै जु०॥देवस्य० भ्यां पूष्णे जु०

५ देवस्य त्वा० भ्यां मरुद्भ्यो० ६॥देवस्य त्वा० द्यावापृथिवीभ्यां जु०॥ प्रोक्षणे॥देवस्य० भ्यामग्नये वो

जुष्टं प्रोक्षामि सोमाय सवित्रे सरस्वत्यै पूष्णे मरुद्भ्यो द्यावापृथिवीभ्यां॥यद्यपि गजपांते प्रातर्दोहः सा

यंदोहवत्॥उदगग्रेण पवित्रेण॥आग्नेआतंचनादीनां निवृत्तिरर्थलुप्तत्वात्॥अग्निहोत्रहवणी ऐष्टिक

तंत्रे व्यापृतत्वात्॥कमंडलुगताभिरद्भिः पात्राणां प्रोक्षणं सर्वमन्यत्सायंदोहवत्॥अधिवपने चर्वर्थान्

विभज्याधिवपति॥देवस्य० भ्यामग्नये जुष्टमधिवपामि॥सवित्रे पूष्णे मरुद्भ्यो द्यावापृथिवीभ्यां॥क

पालोपधानेआग्नेयार्थमष्टौकपालान्युपधायतदुत्तरतः सोमायचरुस्थाली पूर्ववदधिश्रित्यतदुत्त
५ रतःसवित्रेद्वादशकपालान्युपधायतदुत्तरतःसारस्वतपौष्णाभ्यां चरुस्थाल्यौ पूर्ववदधिश्रित्यतदु
त्तरतोमरुद्भ्यः सप्तकपालान्युपधायतदुत्तरतस्त्रूस्थीउपवेषेणांगारं १। आदेवयजंवहेतिनिधा
5 यस्थाल्यामुदगग्रंशाखापवित्रंनिधायप्रातर्दोहंपयआनीयमेक्षणेनालोड्य ध्रुवासिपृथिवीमि
त्यनेनाधिश्रित्यएनांप्रदक्षिणमंगारैःपरिचिनोति।।निर्द०यः। तदुत्तरतोद्यावापृथिवीयमेकक
पालमुपधाय।।भृगूणामं०।।तप्यस्वेत्यंगारैरेककपालमभिवास्य।।यद्घर्मेकपालमुपचिन्वंतिवेधसः
पूष्णस्तदपिव्रतइंद्रवायूमुंक्तां।।इत्येककपालमनुमंत्रयते।।संवपने।।देवस्य०भ्यामग्नयेजुष्टं
संवपामिसविमरुद्भ्योद्यावापृथिवीभ्यां।पुरोडाशीयाश्वरव्याश्चपृथक्कृत्याभिमृशति।।अग्न
येत्वा।।सोमायवः स्तंडुलान् २ सवित्रेत्वा।।सरस्वत्यैवः तंडुलान् ४ मरुद्भ्यस्त्वा। द्यावापृथिवी ५
भ्यांत्वा।।नपुष्णोभिमर्शनमसंस्पृष्टत्वात्।।मखस्यशिरोसिइत्यादिघर्मोस्थकिंभायुषइतिसोम्य
सारस्वतयोस्तिरः पवित्रंतंडुलान्प्रक्षिप्यतथैवघर्मासिक्किंभायर्ं॰षि।।इतीपोष्णः पिष्टानिष्ठ

क्षिप्यमाणं तमधिश्रित्य जातं दुग्धे तत्तेपयसि उदगग्रं शाखापवित्रं निधाय प्रसाय्यं दोहं दध्या नयति ॥
सामिक्षा ॥ तां य एकविंश्विकुशलः परिधिषेन प्रपयित्वा विभक्त। वाजिनां कृत्वा शीतं कृते निधाय ततो द्यावा
पृथिवीयं पुरोडाशमधिश्रित्य तिरः पवित्रं स्थाल्यां। महीनां पयोसीत्याज्यं निरूप्य तथैव दधिस्थाल्यां
तिरः पवित्रं पृषदाज्याय तूष्णीं दधि च निरूप्य आज्यमधिश्रित्य सवं गृहीत्वा दिवरुषु अग्ने हव्यं
रक्षस्वेत्यभिमंत्र्य संप्रक्षणात् व्यस्वेत्यादि प्रोक्षणी रादेसा येत्र० ह्वि। तूष्णीं वा पृषदाज्यग्रहणीं पत्नीं
सन्नह्याज्येन च दध्ना चोदेहीति संप्रेष्य॥ पत्न्याज्यावेक्षणं तं कृत्वा तूष्णीं दध्यवेक्ष्य। तेजोसीत्याज्यम
धिश्रित्य पृषदाज्येन सह आज्यस्थाल्यं प्राङ्‌ हृत्वा अग्निस्तेतज इत्याहवनीये। धिश्रित्य उभयमप्य
ग्रेण प्रोक्षणी पर्याहृत्यां तवै दिद क्षिणार्धे स्फ्यवर्त्मन्सादयति अधिश्रयणवर्जं तूष्णीं दधि निसर्वं क्रि
यते॥ ततः आज्यमसीत्यादि आज्यवत् तूष्णीं पृषदाज्यं उत्पूय जुह्वां प्रकृतिवच्चतुर्गृहीतं गृहीत्वा उपभृ
त्यपि चतुर्गृहीतं गृहीत्वा पृषदाज्यग्रहण्यां उपस्तृणाति॥ महीनां पयोसि। यजमान० स्रुवी यां यत्वा गृ०
अ० पुनरुपस्तृणाति। विश्वेषां देवानां तनूः। यज। स्रुप्रजास्त्वा० अ० पृषदाज्यग्रहण्यां बर्हिषि अंतर्धाय
दध्यानयति॥ ऋध्यासम द्य पृषतीनां ग्रहं पृषतीनां ग्रहो सि। अपोद्धृत्य। बर्हिष्यभिघारयति॥ विलो

६ हृदयमसि।यज॥रायस्पोषा०अध्व०रकमिषविष्णुस्त्वा वि चक्रमे॥भूतिर्दशाद्य तेनवर्धतांमितिपु
नरभिघारयति॥यज०ब्रह्मवर्चस०अध्वर्युः ध्रुवायांप्रकृतिवत्‌स्रग्रहीलाबर्हिरास्तरणेमुष्टित्रयनिर्मि
तमेकैकंमुष्टिमेकीकृत्य त्रिविधंबर्हिस्तीर्य कार्ष्मर्यमयान्परिधीन्परिधायप्रस्तरंशाखापवित्रेणस
हसादयति॥स्रुगासादने उपभृन्मंत्रेणोपभृद्धृतस्पृषदाज्यग्रहण्यासादनंदारुपात्र्यांपुरोडाशार्थान्मंत्रे
णोपस्तीर्य।आमिक्षाव्युद्धरणपात्रेत्कृस्नीमुपस्तीर्यआशयपात्रेस्योनंतइत्यादिनोपस्तरणाति॥नचबर्
6 र्थमुपस्तरणं॥उद्वासनंत्राज्यसंतर्पणंकुर्यात्॥इदमहं०सेनायेत्यादि॥आप्यायतांघ्र०साग्नयेजुहृम
भि०भूतउ०त्राइः०यस्त०आप्या०सासोमायजु०भूत०आइन्द्रोभुवनस्यगोपाः॥आप्या०सासवित्रेजु०३
भूत०आप्यायता०सासरस्वत्यैजु०४ आप्यास सापूष्णेजु०भूत०त्राइन्द्रो०आप्याय०सामरुद्भ्यो०६
आमिक्षास्वस्थानेधिश्रित्यतत्कृस्नीमभिघार्योद्वास्यव्युद्धरणपात्रेआमिक्षाव्युद्धृत्यतदुपरिकिंचिद्वाजि
नमानीयपुनरभिघार्यालंकरोति॥यस्तआत्मापशुषुप्रविष्टोदेवानांविष्ठामनुयोवितस्थे॥आत्म ६
न्वांत्सोमघृतावान्हिभूत्वादेवान्गच्छस्ववर्विंदयजमानायमह्यं॥इदमहं०आप्याय०साद्यावापृथि
वीभ्यांजु०भूत०आप्या०यस्त०आशयपात्रेप्रतिष्ठाप्यतस्मिन्बद्धाज्यमानीय।विःपृषदंकृत्वाकपाला

निम्नत्पज्योद्वास्यएककपालमुद्वासयति॥ यद्धर्मे० प्रसस्तदपि० विमुंमचेतां। स्रुवमाज्येनापूयेत्या दि
व्याहुतिभिरंतर्वेद्यां॰ सादयति॥ यजमानःआसन्नाभिमंत्राणांतंकृत्वा॥ आहवनीयसमीपेअधि
मंथनशकलमेकंप्रागायतंनिदधाति। अग्नेर्जनित्रमसि। वृषणसंज्ञितौद्वौ लौकिकोशकला
वधिमंथनस्यपार्श्वयोः प्रागायतौहस्ताभ्यांयुगपन्निदधाति॥ वृषणौस्थः। दक्षिणेनोत्तरारणिंसव्ये
नाधरारणिमादत्ते॥ उर्वश्यस्यायुरसि पुरूरवाः॥ तेअपूर्वाल्पाज्यस्थाल्यांसमनक्ति॥ घृतेनाक्ते॰
वृषणंदधाथां॥ अधिमंथशकलेअरणीनिधायपजमानंवाचयति॥ गायत्रंछंदोनुप्रजायस्वत्रैष्टु
भंछंदोनुप्रजायस्वजागतंछंदोनुप्रजायस्व॥ मथ्नन्नाह॥ अग्नयेमथ्यमानायानुब्रू३हि॥ जातआह।
जातायानुब्रू३हि॥ जातमग्निमाहवनीयेप्रहरन्नाह॥ प्रह्रियमाणायानुब्रूहि॥ प्रहरति॥ यजमानेः
न्वारब्धः॥ भवतन्नःसमनसौसमोकसावरेपसौ॥ मायज्ञं॰ हिं॰ सिष्टंमायज्ञपतिंजातवेदसौशिवौ
भवतमद्यनः॥ अवपूर्वाज्येनसकृद्गृहीतेनजुहोति॥ अग्नावग्निश्चरतिप्रविष्टऋषीणांपुत्रोअधिराजए
षः॥ स्वाहाकृत्यब्रह्मणातेजुहोमिमादेवानांमिथुयाकर्भागधेयं॰ स्वाहा॥ प्रविष्टायाग्नयइदं॥ हो

सर्वं
तरेहीत्यादिसप्तदशसामिधेन्योनवप्रयाजाःप्रकृतिवत्त्रीनिष्ट्वा।अर्धमौपभृतमाज्यंजुह्वामा
७ नीयतेनोपरितनांश्चतुरःप्रयाजानिष्ट्वाऔपभृतमाज्यंजुह्वामानीयतेनाष्टमनवमौयजति॥प्राग्ना
स्विष्टकृतश्चतुरःप्रयाजानिष्ट्वापंचमादीन्मध्येजुहोति॥यजमानेचतुरःप्रयाजान्प्रकृतिवदनुमं
त्र्यपंचमेनशिष्टाननुमंत्रयते॥एवंनवप्रयाजानिष्ट्वोदङ्ङत्याक्रम्यप्रयाजशेषेणध्रुवामभिघार्य
आनुपूर्व्येणहवींष्यभिघारयतिपृषदाज्यग्रहणीमंततोभिघार्यनोपभृतंप्रकृतिवदाज्यभागाभ्यां
चरित्वा॥आग्नेयादिमास्तान्प्रचर्यविश्वेभ्योदेवेभ्योनुब्रूहि।इतिसंप्रेष्योपस्थानाभिमर्शनवर्जं
मामीक्षायाःपश्चात्सर्वांध्रुवावदायाभिघार्यामिक्षांप्रत्यभिघार्यप्रत्याक्रम्याश्राव्यप्रत्याश्राविते आ
ह।विश्वान्देवान्यजेति।संप्रेष्यवषट्कृतेदक्षिणोदङ्ङत्याक्रम्यजुह्वामुपस्तीर्यउपांशुद्यावापृथिव्यैककपा
लयोःप्रचारः द्यावापृथिवीभ्यामनुब्रूहि इति x त्या x संप्रेष्योपस्थानाभिमर्शनवर्जंसर्वंपुरोडाशं
जुह्वामाधायसकृदभिघार्याशयाज्यंप्रत्यभिघार्यात्याक्रम्याश्राव्यप्रत्याश्रावितेद्यावापृथिवीयजेति ७
संप्रेष्यवषट्कृतेअपर्यावर्तयन्प्रतिष्ठितंदक्षिणोदङ्ङत्याक्रम्यचतुर्भिर्मासनामभिःस्रुवेणैककपा

लमभिजुहोति॥ मधुभ्यस्वाहा॥ मधवइदं। माधवभ्यस्वाहा। माधवायेदं॥ शुक्रभ्यस्वाहा। शुक्रायेदं॥
शुचिभ्यस्वाहा। शुचयइदं॥ यजमानानुमंत्रणे॥ अग्नेरहं देवयज्यया न्नादोभूयासं१ सोमस्याहं दे
वयज्यया प्रजयाचपशुभिर्भजनिषीय २ सवित्रइदं॥ सवितुरहं देवयज्यया स्वस्तिमान्पशुमान्भू
यासं॥३॥ सरस्वत्याइदं॥ सरस्वत्या अहं॰ यावाचमन्नादांपुषेयं॥४॥ पूष्णइदं॥ पूष्णोहं देवयज्यया॰
पुष्टिमान्पशुमान्भूयासं ५ मरुद्भ्यइदं॥ मरुताम॰ याप्राणेर्न्द्ध्यासम् ६ विश्वेभ्योदेवेभ्यइदं॥ विश्वेषां
देवानामहं॰ प्राणैःसायुज्यंगमेयं॥ ७॥ द्यावापृथिवीभ्यामिदं॥ द्यावापृथिव्योरहं॰ भूमानंप्रतिष्ठां
गमेयं॥ ८॥ स्विष्टकृति आग्नेयादिवेभ्यदेयंतानामुत्तरार्धात्सकृत्सकृद्ववदायाशयाज्यावदाय द्वि
रभिघार्यस्रुवेणाज्यमाहवनीयेत्रस्त्रीकृत्वा मेक्षणान्यादायात्याक्रम्याश्राव्यप्रत्याश्राविते ऽग्निस्विष्ट
कृतंयजेतिवषट्कृते हुत्वामेक्षणान्यनुप्रहृत्यसंस्त्रावेण भिहुत्वोदंङ त्याक्रम्यत्यादिइजयाशया
ज्यादवद्यति॥ अन्वाहार्यमासाद्यद्वादशगावः प्रथमजंवत्संचददाति॥ देवस्य॰ ब्रह्मणे रुद्रायगाः
ताभिर॰ तु॥ देवस्य॰ णेरुद्रायगांतेनाम॰ तु॥ हविःशेषानु॰ अग्रेणगार्हपत्यंदर्भांस्तीर्यतिष्वग्नि

होत्रहवणीकं संचाद्य॥ इमौप्राणापानाविति मंत्रेण पवित्रं कृत्वा पवित्रेस्थउ इत्यङ्गिरनुमृज्य यज
मानवाचं यच्छेत्युक्ता वेषायत्वेत्यग्निहोत्रहवणीमादाय प्रत्युष्टमिति गार्हपत्ये निष्टप्य देवोवइति
त्रिरुत्पूय आपोदेवीरित्यादि प्रोक्षितास्थेत्यंतं कृत्वा कंसमुत्तानं कृत्वा प्रोक्षति॥ शुद्धं स्वं यो। प्रस्त
रेपवित्रे स्थ्लं सी विसृज्य यज्ञयोगानंतरं मंत्रेण स्फ्यमादाय वेदीं त्वतीय देशे स्तब्ध्वाह प्रोक्षणीरासा
दयकं सं संमृद्धीति संप्रेष्यतीति। आग्नीध्रः कंसं परिभोजनीयदर्भांश्चादाय गार्हपत्ये निष्टपति॥ प्रत्यु
8 ष्टं यो ग्नेस्त्वा ते जिष्ठेन मि॥ वाचं प्राणं मा निर्मृक्षं वाजिनं त्वा सपत्नसाहिं संमार्ज्मि॥ दिवः शिल्प
मिति संमार्गं तृणानि गार्हपत्ये प्रहृत्य कंसमग्रेणोत्करं दर्भेषु सादयेत्। आज्यस्थालीं स्रुवं चादा
य प्रदक्षिणमावृत्य प्रत्यङ् उदुत्य वाजिनं गार्हपत्ये धिश्रित्य अभिघार्योद्वास्य पुनरभिघार्य यस्त्व
आत्मेति सान्नाय मंत्रेणालं कृत्य यजमानेन सह ांतर्वेद्यां भूर्भुवः स्वः यजमानोयन्मे अग्नइत्यनेनाभि
मिमंत्रणे कृते अहमन्यस्थास्यामइत्यादि एतदस्तु कृतं तवेत्यर्थं कृतं प्रकृतिवत्॥ एष दाज्यं जुहुमानी
य अत्यक्रमाश्राव्य प्रत्याश्रावितेदेवान्यजेति प्रथमं संप्रेष्य प्रेतिवषट्कृते जुहोति। यजयजेतीतरात्

एवमस्यावनुयाजानिष्ट्वा नवमं सर्वांत्समभिद्रुत्य यजेत्। यजमान आयां स्त्री प्रजावानिति तदुपरि तनांस्त्रीन
ष्टमं पशुमानिति सप्तम नवमावायुष्मानिति देवाय प्रजावान् बर्हिषोऽहं देव प्रजावान्। देवीभ्यो द्वार्भ्य इ
दं॥ द्वारामहं देव० प्रजावान्० सं॥ ३ देवीभ्यामुषासानक्ताभ्यामिदं॥ उषासानक्तयोरहं० प्रजावान्०॥
देवीभ्यां जोष्ट्रीभ्यामिदं॥ जोष्ट्र्योः० प्रजावान्० देवीभ्यामूर्जाहुतीभ्यामिदं० ऊर्जाहुत्योर०पशुमा०
देवाभ्यां दैव्याभ्यां होतृभ्यामिदं०। दैव्ययोर्होत्रोर०पशुमान्० देवीभ्यस्तिसृभ्य इदं०॥ तिसृणां तिसृणां दे
वीनामहं० यायुष्मान्यतेन प्र०॥ देवाय नराशंसाय नराशंस० पशुमा०॥ ८ ।देवाग्नये स्विष्टकृत इ
दं० अग्नेः स्विष्टकृतोऽहं० यं॥ ८ ॥सर्वत्राग्नय इति वा त्यागः॥ उदङ्ङुत्याक्रम्येत्यादि स्रुग्व्यूहनेउपभृत
पृषदाज्यग्रहणी व्यूहेत्। अनंतरं उपभृन्मंत्रेण पृषदाज्यग्रहण्यामप्यंजनं॥ उज्जितिवाचने॥ अग्नेर
हमु०। सोमस्याहमु० सवितुरहमु० सरस्वत्या अहं० पूष्णोऽहमु० मरुतामहमु० विश्वेषां देवानाम०
द्यावापृथिव्योरहमु०। देवानां। नामित्यादि० शाखापवित्रं प्रस्तरेण सह प्रहरेत्॥ तिसृभिः संस्रा
वहोमः। स्रुग्विमोके॥ अग्नेर्वोऽपन्नगृहस्य० स्रुग्भिन्य: स्रुग्ने गाधत्त धुरि धुर्यः पात॥ अथ संप्र
ष्टकं सं अंतर्वेद्यां निधाय बर्हिषि सर्वतः पातयन्नुपस्तरणाभिघारणवर्जं किं से वाजिनमानयन्नाह।

वाजिभ्योनुब्रूहि। अत्याक्रम्याश्राव्यप्रत्याश्राविते। वाजिनोयज। वषट्कृतेजुहोति। वाजिभ्यःस्वाहा।
वाजिभ्यइदं॥ वाजिनामहंदेवयज्ययारेतस्वीभूयासं॥ अनुवषट्कृतेजुहोति॥ अग्नयइदं॥ अग्नेर
रहं० यायुष्मान्भूयासं न्यज्ञे० यं॥ उदङ्ङत्याक्रम्य कंसस्थवाजिनशेषंहोतुर्हस्ते प्रदाययजमान
पंचमाःसर्वेमन्वारभ्यस्वमेनोव्यतिरिक्तोपहवंकुर्युः॥ होता। अध्वर्युः उपह्वयस्व॥ ब्रह्मन्नु
पह्वयस्व २॥ अग्नीदुपह्वयस्व ३॥ यजमानोपह्वयस्व ४॥ एवमध्वर्युः। होतुरु० ब्रह्मन्नु० अग्नी
दुप० यजमानः। एवंब्रह्मा। होतु० अध्व० अग्नी० यजमानः॥ एवमाग्नीध्रः॥ ३ होतु० अध्व०
ब्रह्मन् यज० एवंयजमानः॥ होतुरु० अध्वर्युं ब्रह्मन्न० अग्नीदु०। इतरे उपहूतइतिब्रूयुः
उपहवक्रमेणभक्षयंति॥ आग्नीध्राध्वर्युः अवघ्रहणभक्षतः। यजमानः प्रदेश॥ सर्वेषांमन्त्रः॥
यन्मेरेतः प्रसिच्यते यन्मआप्यायते यद्वाजायतेपुनः॥ यद्वामेप्रतितिष्ठाति तेनमावाजि
नंकुरु तेनमारेतस्विनंकुरु॥ तेनमाशिवमाविशतस्यते वाजिपीतस्यमधुमत उपहूतस्यो
पहूतोभक्षयामि॥ आचम्यनिर्णिज्यपात्रंप्रयच्छत्यध्वर्युर्होत्रेवेदं० प्रदायेत्यादिपत्नीसंया
ज्यप्राड्० त्यध्रुवामाप्याय्यप्रकृतिवत्। प्रायश्चित्तानिहुत्वाबर्हिर्बाधात्तूंत्स्मर्जयप्रहृत्यदासि

णेनपदावेदिमवक्रम्यातिष्ठन्ध्रुवाज्यास्रुवेणोपहत्यप्रथमंसमिष्टयजुर्जुहोति॥यज्ञोयज्ञंगछय
ज्ञपतिंगछस्वांयोनिंगछस्वाहा॥पुनरादायद्वितीयंजुहोति॥एषतेयज्ञोयज्ञपतेसहसूक्तवाकः
सुवीरःस्वाहा।यज्ञपतयइदं॰।ध्रुवयैवतृतीयंजुहोति॥देवागातुविदोगातुंवित्वा॰यातेधाःस्वा
हा॥देवेभ्यइदं॰॥ततःप्रणीतानिनयनादिकस्त्वापुनक्तीत्यंतेयजमानउत्करेउपविश्यस्थू
लप्रदेशमुपगृह्णाति॥यंदेवामनुष्येषूपवेशमधारयन्॥येअस्मदपचेतसस्तानस्मभ्यंमि
हाकुरु॥उपवेषोपविड्ढिनःप्रजांपुष्टिमथोधनं॥द्विपदोनश्चतुष्पदोध्रुवाननपगान्कु
रु॥ततःपयस्वतीरित्यादिब्राह्मणतर्पणांतंसमानं॥यजमानःप्राङ्मुखःस्वायतनेउपवि
श्यकेशान्निवर्तयिष्ये।श्मश्रूणिवापयिष्ये॥अधःशयिष्ये॥मधुमांसलवणस्त्र्यवले
खनानिवर्जयिष्ये।इति।अथाध्वर्युःप्रत्यङ्मुखःप्राङ्मुखस्यासीनस्यस्वायतनेयजमा
नस्यशिरसिकेशान्प्रागादिदिक्चतुष्टयमध्येतिवेणीःपंचशलत्यापंचधाविभजेत्॥
ऋतमेवपरमेष्ठी।ऋतंनात्येतिकिंचन॥ऋतेसमुद्रआहितः।ऋतेभूमिरियंश्रिता।अग्नि

२० स्तिग्मेनेशोविषा॥ तपश्चाकांतमुक्तिहा॥ शिरस्तपस्याहितं॥ वैश्वानरस्यैरं तेजसा॥ के
तेनास्य निवर्तये॥ सत्येन परिवर्तये॥ तपसास्यानुवर्तये॥ शिवेनास्योपवर्तये॥ शग्मेना
स्याभिवर्तये॥ शीर्लस्त इ तं तेद्वै तंतत्सत्यं तेन राध्यासं॥ प्रतिविभागं मंत्रावृत्तिः॥ विभाग
क्रमेण लोहितायसस्य क्षुरेण वपनेनैव मंत्रेण प्रतिवपनं मंत्रावृत्तिः॥ यजमानः स्नात्वा
स्वायतने उपविश्य संवत्सरीणां स्वस्तिमाशास्ते॥ इति ब्रूयात्। संतिष्ठते॥ ॥ ॥
॥॥ इति वैश्वदेवपर्व समाप्तम्॥ ॥

वैश्वदेवपद्धतिः

श्लो०
२२०